International Journal of Sanskrit Research 2024; 10(6): 70-73

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2024; 10(6): 70-73
© 2024 IJSR
www.anantaajournal.com
Received: 18-08-2024
Accepted: 24-09-2024

**नीलकमलपण्डितः**
सहायकाचार्यः, संस्कृतविभागः
दरङ्गमहाविद्यालयः, तेजपुरम्,
शोणितपुरम्, असमः, भारत

**Corresponding Author:**
**नीलकमलपण्डितः**
सहायकाचार्यः, संस्कृतविभागः
दरङ्गमहाविद्यालयः, तेजपुरम्,
शोणितपुरम्, असमः, भारत

# उपनिषत्सु नैतिकतत्त्वानि

**नीलकमलपण्डितः**

## सारांश
सकलज्ञानाधारभूताः मानवजीवनोन्नायकाः निःश्रेयसमार्गस्वरूपाः भारतीयसनातन- संस्कृतेः धारकाः परमात्मनश्शाश्वतीवाणीरूपाः वेदा एव सन्ति जगत आदिमज्ञानराशयः । विश्वस्यागमेषु वेदाः प्राचीनतमाः। विद्यन्ते धर्मादयः पुरुषार्थाः यैस्ते वेदाः । मन्त्रब्राह्मणयोर्निमित्तेन 'वेद' इत्येतस्य पदस्य प्रयोगो विधीयते । तत्र मन्त्रात्मकवेदभागः संहितापदेन व्यपदिश्यते यत्र देवतानां स्तुतिर्विधानं विद्यते । ब्राह्मणरूपवेदभागस्तु संहिताभागस्य व्याख्यारूपः। ब्राह्मणमपि भागत्रये विभक्तम्। तद्यथा ब्राह्मणम्, आरण्यकम् उपनिषच्च । यज्ञस्वरूपप्रतिपादको ब्राह्मणभागः, अरण्ये पठिताः यज्ञस्याध्यात्मिकरूपं विवेचयन्तो वेदभागाः आरण्यकानि, उपनिषदो ब्रह्मबोधकाः मोक्षसाधकाश्च।उप-नि-उपसर्गपूर्वकात् विशारणगत्यवसादनार्थकात् षद्लृ-(सद्)-धातोः क्विपि उपनिषच्छब्दो निष्पद्यते। तत्त्वज्ञानार्थं गुरोः समीपे सविनयं स्थितिः उपनिषद् इत्युच्यते। ।इयम् उपनिषदेव अध्यात्मज्ञानस्य मूलमिति प्रोच्यते । उपनिषत्साहित्यं तु अत्यन्तं निगूढं वेदस्य शीर्षत्वात् ।
वस्तुत उपनिषत्सु ब्रह्मप्राप्ति-आत्मतत्त्व-आध्यामिक-विषयाणामेव केवलं समावेश इति चिन्त्यते अनधीतोपनिषद्भिः। परन्तु यथार्थत उपनिषत्सु ब्रह्मप्राप्त्यादितत्त्वविवरणपुरःसरं मनुष्याणां व्यवहारिके जीवने आवश्यकानि अनुशासन – आत्मसंयम-श्रद्धा- सत्यप्रभृतीनि तत्त्वान्यपि बहुलतया निहितानि दृश्यन्ते । तज्ज्ञानाय तु तासां सश्रद्धमध्ययनं गभीरावलोकनं हृदयङ्गमञ्चात्यावश्यकम् । यतोहि ब्रह्मप्राप्तिसाधनभूतपन्था अत्यन्तं दुष्करः । अत उपनिषत्सु तद्ब्रह्मप्राप्तिसौकर्याय सोपनानि निर्दिष्टानि किञ्च तत्प्रतिपादनानुगुणमेव मानवानां दैनन्दिनजीवने पालयितव्यानि नैतिकतत्त्वान्यपि निगदितानि सन्ति । साम्प्रतं लोकेऽस्मिन् प्रतिदिनं जनानां नैतिकमूल्यानां ह्रासः परिलक्ष्यते । इदं तु मानवसमाजस्य कृते चिन्तनीयो विषयः । मनुष्येषु जायमाना अतिशयभोगतृष्णा एव अनैतिकतायाः बीजोस्ति । जनानां लालसा – आत्मासंयमादिकारणादेव परस्परातिशयविरोधो हिंसा लुण्ठनम् चेत्यादीनि शास्त्रविरुद्धानि अनैतिककार्याणि सम्भवन्ति। वेदस्य शीर्षभूतोपनिषत्सु मानवजीवनोत्कर्षकाः परमपन्थान उपदिष्टाः सन्ति बहुसहस्रवर्षात्पूर्वमेव । तेषाम् उपनिषन्निहितनैतिकसिद्धान्तानां मूल्यानां वा प्रासङ्गिकत्वम् अतिशयेन वर्तते अद्यतनीयाधुनिकसमये । उपनिषत्सु येषां नैतिकमूल्यानां विवेचनं विद्यते तेषां तत्त्वानां विवेचनम् अल्पधिया मया शोधपत्रेऽस्मिन् किञ्चित् उपस्थाप्यते।

**कूटशब्दाः** वेदः, उपनिषद्, नैतिकता

## प्रस्तावना
उप-नि-उपसर्गपूर्वकात् विशारणगत्यवसादनार्थकात् षद्लृ-(सद्)-धातोः क्विपि उपनिषच्छब्दो निष्पद्यते। तत्त्वज्ञानार्थं गुरोः समीपे सविनयं स्थितिः उपनिषद् इत्युच्यते। किञ्चोक्तं मुण्डकोपनिषदि- "य इमां ब्रह्मविद्यामुपनयन्त्यात्मभावेन श्रद्धाभक्तिपुरः सराः सन्तस्तेषां गर्भजन्मजरारोगाद्यनर्थपूगं निशातयति परं ब्रह्म वा गमयति अविद्यादिसंसारकारणञ्चात्यन्तमवसादयति विनाशयतीत्युपनिषद् | यया विद्यया स्वाध्यायप्रवचनाभ्यां ब्रह्मोपस्थातुं समर्था भवन्ति सा ब्रह्मविद्या 'उपनिषद्' नाम्ना कथ्यते । उप-नि-पूर्वस्य सदेरेवमर्थस्मरणात्"[1] इति ।इयम् उपनिषदेव अध्यात्मज्ञानस्य मूलमिति प्रोच्यते । उपनिषत्साहित्यं तु अत्यन्तं निगूढं वेदस्य शीर्षत्वात् । ब्रह्मज्ञानोपदेशपुरःसरं मानवजीवनोपयोगीनि नैतिकतत्त्वानि सरलरीत्या उपनिषत्सु भूयिष्ठा प्रतिपादितानि । एवम् उपनिषन्निहितनैतिकतत्त्वविषये यथामति उल्लख्यते।

## नैतिकतत्त्वानि
नैतिकं नाम नीतियुक्तम्, तत्त्वं नाम वास्तविकी स्थितिः सारो यथार्थो वा । वस्तुत उपनिषत्सु ब्रह्मप्राप्ति-आत्मतत्त्व-आध्यामिक - विषयाणामेव केवलं समावेश इति चिन्त्यते अनधीतोपनिषद्भिः। परन्तु यथार्थत उपनिषत्सु ब्रह्मप्राप्त्यादितत्त्वविवरणपुरःसरं मनुष्याणां व्यवहारिके जीवने आवश्यकानि अनुशासन - आत्मसंयम-श्रद्धा- सत्यप्रभृतीनि तत्त्वान्यपि बहुलतया निहितानि दृश्यन्ते । तज्ज्ञानाय तु तासां सश्रद्धमध्ययनं गभीरावलोकनं हृदयङ्गमञ्चात्यावश्यकम् । यतोहि ब्रह्मप्राप्तिसाधनभूतपन्था अत्यन्तं दुष्करः । अत उपनिषत्सु तद्ब्रह्मप्राप्तिसौकर्याय सोपनानि निर्दिष्टानि किञ्च तत्प्रतिपादनानुगुणमेव मानवानां दैनन्दिनजीवने

---

[1] मुण्डकोपनिषद्भाष्यभूमिका

पालयितव्यानि नैतिकतत्त्वान्यपि निगदितानि सन्ति।

साम्प्रतं लोकेऽस्मिन् प्रतिदिनं जनानां नैतिकमूल्यानां हासः परिलक्ष्यते । इदं तु मानवसमाजस्य कृते चिन्तनीयो विषयः। मनुष्येषु जायमाना अतिशयभोगतृष्णा एव अनैतिकतायाः बीजोस्ति । जनानां लालसा - आत्मासंयमादिकारणादेव परस्परातिशयविरोधो हिंसा लुण्ठनम् चेत्यादीनि शास्त्रविरुद्धानि अनैतिककार्याणि सम्भवन्ति। किञ्च वैदिककाले एव मनुष्याणां मनस्सु अनैतिकभावो जागृतो बभूव इति यमयमी–अक्षप्रभृतिषु सूक्तेषु एव दृश्यते । तदर्थमेव वेदस्य शीर्षभूतोपनिषत्सु मानवजीवनोत्कर्षकाः परमपन्थान उपदिष्टाः सन्ति बहुसहस्रवर्षात्पूर्वमेव । तेषाम् उपनिषन्निहितनैतिकसिद्धान्तानां मूल्यानां वा प्रासङ्गिकत्वम् अतिशयेन वर्तते अद्यतनीयाधुनिकसमये। उपनिषत्सु येषां नैतिकमूल्यानां विवेचनं विद्यते तेषां तत्त्वानां विवेचनम् अल्पधिया मयाऽत्र किञ्चित् उपस्थाप्यते-

**आत्मज्ञानम्:** मूलत उपनिषत्सु एकमेव लक्ष्यं निर्धारितमस्ति आत्मज्ञानपुरःसरं ब्रह्मज्ञानप्राप्तिः । अतः उपनिषत्काले एव जीवनस्य सर्वाङ्गीणविकासाय आत्मज्ञानावाप्ति अत्यावश्यक इति समुद्दिष्टः । उपनिषत्सु जीवनस्य सर्वोच्चनैतिकमूल्यम् आत्मज्ञानप्राप्तिरेवासीत्। उपनिषत्सु प्रोक्तं यत् - नैतिकमूल्यानां स्रोत आत्मा एव वर्तते। अत आत्मनो वास्तविकस्वरूपस्य ज्ञानं प्रयोजनीयम्। लोके तु सामान्यतया दृश्यते एव यत् बहुविधसम्भावनां स्वात्मनि धारयन्तः जनाः आत्मज्ञानाभाववशात् ताः सम्भावनाः बहिः प्रकाशयितुं समर्थाः न भवन्ति। किञ्च ते अनावश्यकेष्वेव विषयेषु निरता भवन्ति आत्मज्ञानहीनाः जनाः। तस्मादेवोच्यते-

"आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः"[2]

-अर्थात् अयं ज्ञानाधिकरणरूपात्मा दर्शनीयो, मननीयो, निदिध्यासनीयाश्चास्ति । आत्मा भोगायतनशरीरस्य सञ्चालनकर्ताऽस्ति । आत्मज्ञ एव कर्तव्येषु प्रवृत्त अकर्तव्येषु च निवृत्तो भवति चक्षुरादीन्द्रीयसंयमपूर्वकम्। तथा हि उक्तम्-

"आत्मानं रथिनं विद्धि शरीरं रथमेव तु।
बुद्धिं तुसारथिं विद्धि मनः प्रग्रहमेव च॥
"इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्।
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः॥[3]" इति

एवम् आत्मज्ञानलाभानन्तरमेव मानवः सर्वेष्वपि लोकेषु पर्यटितुं प्रभवति।

**आहारमाहात्म्यम्:** उपनिषत्सु वर्णितं यत् आत्मज्ञान-परमपदावाप्त्यर्थं नैतिकमूल्यानि जीवने व्यवहारे आनेतव्यानि। आहारविषये उपनिषदः कथयन्ति -यत् भोजनं गृह्यते, तस्य प्रभाव अस्माकं सर्वेष्वपि अङ्गेषु भवति। वस्तुतः भोजनं त्रिविधं वर्तते - सात्विकम्, राजसिकं, तामसिकञ्च। अतः अस्माभिरपि सात्विकाहार एव ग्राह्यः। येन व्यक्तौ सात्विक ऊर्जः सञ्चरति। मानवसंरचना तु शाकाहारि अन्नानुरूपमस्ति। किञ्च भोक्ता आहारेण सह तन्निर्मातुः मनसः प्रकम्पनमपि गृह्णातीति वैज्ञानिकैरपि प्रमाणितम्। यदि कश्चन क्रोधी अशान्तः अवसादग्रस्तो वा जनः भोजनं निर्माति तर्हि तस्य प्रभावः तद्भोक्तृषु एव भवति। यथोक्तम्-

आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः"। [4]इति

अन्नस्य माहात्म्यं तु उपनिषत्सु बहुलतया प्रकाशितम्। दुःखदेया स्थितिः यत् साम्प्रतं आधुनिके काले भुवि प्रतिवर्षं बुभुक्षावशात् प्रायशः त्रिंशत् लक्षं शिशवः म्रियन्ते। किञ्च बहुत्र भोजनानाम् अपचयो तु दृश्यते एव। अत एव वैदिककाले एव अन्नस्य प्रयोजनीयता प्रदर्शिताऽस्ति। अन्नेव प्राणिसु प्राणः सञ्चरते। उक्तमपि-

तपसा चीयते ब्रह्म ततोऽन्नमभिजायते।
अन्नात् प्राणो मनः सत्यं लोकाः कर्मसु चामृतम्॥ [5]

किञ्च अन्नं परब्रह्मस्वरूपम्। येन हि जीवाः जीवन्ति वर्धन्ते च। परमौषधरूपान्नस्य निन्दा कदापि करणीया। प्रोक्तञ्च बहुधा -

"औषधीभ्योऽन्नम्। अन्नात्पुरुषः, स वा एष पुरुषोऽन्नरसमयः"[6]

"अन्नाद्वै प्रजाः प्रजायन्ते। याः काश्च पृथिवीं श्रिताः। अथो अन्नेनैव जीवन्ति। अथैनदपि यन्त्यन्ततः। अन्नं हि भूतानां ज्येष्ठम् तस्मात्सर्वौषधमुच्यते सर्वं वै तेऽन्नमाप्नुवन्ति येऽन्नं ब्रह्मोपासते । अन्नं हि भूतानां ज्येष्ठम्। तस्मात्सर्वौषधमुच्यते। अन्नाद् भूतानि जायन्ते। जातान्यन्नेन वर्धन्ते अद्यतेऽत्ति च भूतानि तस्मादन्नं तदुच्यत इति। तस्माद्वा एतस्माद् अन्नरसमयादन्योऽन्तर आत्मा प्राणमयः तेनैष पूर्णः।" [7]

"अन्नं ब्रह्मेति व्यजानात्। अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते। अन्नेन जातानि जीवन्ति, अन्नं प्रयन्त्यभिसंविशन्तीति।"[8]

"अन्नं न निन्द्यात्। तद् व्रतम्। प्राणो वा अन्नम्। शरीरम् अन्नादम्।"[9]

"अन्नं न परिचक्षीत"[10]

"अन्नं बहु कुर्वीत"[11]

एवं हि उपनिषत्सु अन्नस्य अर्थात् आहारस्य माहात्म्यमतिशयेन वर्णितम्, किञ्च तेषां उपदेशानां परिपालनं अद्यतनीये समस्याकवलिते संसारे अत्यन्तं प्रयोजनीयम्।

**सत्यस्य माहत्म्यम्:** मानवजीवनस्य परमावश्यकः संशयनिवृत्तिसाधनभूत एक एव गुणोऽस्ति सत्यम्। अस्मिन्नेव सत्यात्मके गुणे सर्वे गुणाः समाहिताः भवन्ति। उपनिषत्सु सत्यस्य सर्वश्रेष्ठनैतिकमूल्यत्वं स्वीकृतमस्ति। इदमेव सत्यतत्त्वं सृष्टेराधार इत्युच्यते। परब्रह्मण एव अपरं नाम सत्यमिति। यदा सत्यस्य पालनं क्रियते तदा मनसि सकारात्मकोर्जः सञ्चरति। सत्यस्य विषये उपनिषदः कथयन्ति यत् सत्यस्य पालनं मनसा वचसा कर्मणा च करणीयम्। अपि च कथयन्ति यत् मनसि सत्यस्य विचारो धारणीयः। उक्तमपि –

सत्यमेव जयते नानृतं सत्येन पन्था विततो देवयानः।
येनाक्रमंत्यृषयो ह्याप्तकामो यत्र तत्सत्यस्य परमं निधानम्॥ [12]

-अर्थात् सत्यवान् जयते नानृतवादीति प्रसिद्धं लोके। सत्यवादिनाऽनृतवाद्याभिभूयते, अतः सिद्धं सत्यस्य बलवत्साधनत्वम् । किञ्च शास्त्रतोऽप्यवगम्यते सत्यस्य साधनातिशयत्वम्। कथम् इत्युच्यते चेद् कथ्यते - सत्येन यथाभूतवादव्यवस्थया पन्था देवयानाख्यो विस्तीर्णः सातत्येन प्रवृतः येन पथा क्रमन्त दर्शनवन्तः ऋषयः कुहकमायाशाठ्याहंकारदम्भानृतवर्जिता विगततृष्णाः सर्वतो यस्मिंस्तत्परमार्थतत्त्वं उत्तमसाधनस्य सत्यस्य सम्बन्धि साध्यं परमं प्रकृष्टं निधानं वर्तते तत्र च येन पथाऽऽक्रमन्ति स सत्येन वितत इति श्रीमच्छङ्कराचार्यपादानां भाष्यवचनम्। किञ्च कठोपनिषदि अपि सत्यपालनस्योपदेशः प्रदत्तः। पितुः वाजश्रवसः नचिकेतसं प्रति क्रोधवशात् निर्गतस्य 'मृत्यवे त्वा ददामीति' वाक्यस्य याथार्थ्येन सत्यपालनाय यमलोकं प्रति गमनोद्यतसमये पिता वाजश्रवा दुःखितोऽभवत्। तदा नचिकेता शोकसन्तप्तं पितरं सान्त्वनाय विवृणोति यत्- अस्माकं पूर्वजैः यथा सत्यस्याचरणं

[2] बृहदारण्यकोपनिषत् २/४/५
[3] कठोपनिषत् १/३/४
[4] छान्दोग्योपनिषत् ७/२६/२
[5] मुण्डकोपनिषत् १/१/ ८
[6] तैत्तिरीयोपनिषत् २/१
[7] तैत्तिरीयोपनिषत् २/२
[8] तैत्तिरीयोपनिषत् ३/१
[9] तैत्तिरीयोपनिषत् ३/७
[10] तैत्तिरीयोपनिषत् ३/८
[11] तैत्तिरीयोपनिषत् ३/९
[12] मुण्डकोपनिषत् ३/९/६

कृतं, तथैव वर्तमानकालेऽपि तस्याचरणं कृतं न वा तदपि द्रष्टव्यम्। किञ्च लोके मृषा कृत्वा कश्चिदमरो न भवति । यतः मनुष्यः सस्यमिव म्रियते पच्यते च, अतः सत्यमवश्यमेव पालनीयम्। तथा हि उक्तम्-

अनुपश्य यथा पूर्वे प्रतिपश्य तथापरे।
सस्यमिव मर्त्यः पच्यते सस्यमिवाजायते पुनः।। [13] इति

अपि च उच्यते-

'सत्यान्न प्रमदितव्यम्'[14]

एवं हि शास्त्रानुगतं सत्यवचनमवश्यमेव ऊहितव्यम् ।

**अलोभः** अस्माकं शास्त्रेषु लोभस्य भूयसी निन्दा कृताऽस्ति । लोभवशादेव सर्वाणि पापानि जायन्ते। उच्यन्तेऽपि लोभः पापस्य कारणमिति। अतः उपनिषत्सु लोभनिवारणाय उपदेशाः प्रदत्ताः। ईशोपनिषदः प्रथमे एव मन्त्रे एवमुक्तम्-

ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्।। [15]

-अर्थात् अस्मिन् संसारे यत्किञ्चित् चराचरात्मकं वस्तु विराजते तत्सर्वमपि परब्रह्मण इच्छया एव परिचालितमस्ति। अतः कदापि अन्यस्य धनादीनाम् लोभो न करणीयः। तस्मात् त्यागभावेन एव अर्जितभोगविषयाणां सेवनं कर्तव्यम्।

**दानम्:** दानस्य महत्त्वं उपनिषत्सु महनीयतया वर्णितमस्ति। लोके तु प्रसिद्धं यत् धनादीनां दानभोगनाशाख्या त्रिविधा गतिर्भवतीति। तत्रापि दानकर्म सर्वश्रेष्ठकर्मत्वेन सर्वत्रापि आम्नायते। किञ्च दानं सर्वदा श्रद्धापूर्वकं आर्थिकस्थित्यनुरूपं लज्जापूर्वकं भययुक्तं विवेकपूर्वकं च स्यात्। न कदापि अश्रद्धया दानं कर्तुम् मनुष्यः प्रवृत्तः स्यात् । तस्मादेव उपदिष्ट एवम्-

"श्रद्धया देयम्। अश्रद्धयाऽदेयम्। श्रिया देयम्। ह्रिया देयम्। संविदा देयम्।"[16]

एवं कठोपनिषदि अपि दानस्य माहात्म्यम् प्रदर्शितम् वर्तते। तत्र यदा पित्रा वाजश्रवसा सकामभावेन क्रियमाणस्य सर्ववेदोयज्ञस्य दक्षिणास्वरूपेण ब्राह्मणेभ्य अदेयाः जीर्णा गावः दत्ताः। तद्दृष्ट्वा अदेयवस्तूनां दानेन दातुः जायमाननिकृष्टगतिविषये नचिकेता एव विवृणोति-

पीतोदका जग्धतृणा दुग्धदोहा निरिन्द्रियाः।
अनन्दा नाम ते लोकास्तान् स गच्छति ता ददत्।। [17]इति

एवं हि निष्कामभावेन कृतस्य दानरूपमहत्कर्मणः माहात्म्यमुपनिषत्सु अतिशयेन वर्णितं वर्तते।

**आतिथ्यम्:** आतिथ्यं भारतीयसंस्कृतेरभेद्यम् अङ्गम्। आतिथ्यस्य परम्परा तु वैदिककालादेव प्रचलिताऽस्ति। अतिथेः देवमयत्वं अस्मदीयपरम्परायां सुप्रसिद्धम् । तस्मात् अतिथिः देवतावत् पूजनीयः। उक्तञ्च-

अतिथिदेवो भव ।[18]इति

वस्तुतः कर्माणि त्रिविधानि भवन्ति काम्यकर्म, नित्यकर्म, नैमित्तिकञ्च। तत्र अतिथिसत्कारः नैमित्तिकं कर्म। आतिथ्येन अभ्युदयप्राप्तिर्भवति अकरणे च पापं भवति। मनुस्मृतौ अपि एव उक्तमस्ति-

उत्तमस्यापि वर्णस्य नीचोऽपि गृहमागतः।
पूजनीयो यथायोग्यं सर्वदेवमयोऽतिथिः।। [19] इति

किञ्च आतिथ्यमहत्त्वं नचिकतोयमोपाख्यानेन कठोपनिषदि प्रदर्शितम् अस्ति। यदा नचिकता पितृवचनपालनाय यमलोकम् जगाम तदानीं यमो यमलोके नासीत्। यमस्य प्रत्यागमने सति तस्य कश्चन शुभचिन्तकः तस्मै यमाय एवमुवाच-

वैश्वानरः प्रविशत्यतिथिर्ब्राह्मणो गृहे।
तस्यैतां शान्तिं कुर्वन्ति हर वैवस्वतोदकम्।।[20]

अर्थात् ब्राह्मणातिथिः अग्निरिव साक्षात् गृहान् प्रविशति । अतः जनाः अतिथेः पाद्यासनादिदानलक्षणां शान्तिं कुर्वन्ति। तस्मात् वैवस्वतं यमं नचिकेतसे पाद्यार्थं जलादिकं आहर्तुमुपदिशति । अस्मिन् विषये आपस्तम्बेऽपि एवं प्रोक्तम्-" अग्निरिव ज्वलन्नतिथिरभ्यागच्छति"
किञ्च अतिथिसंस्कारविमुखात् कीदृशानि अनिष्टानि भवन्ति तद्विषयेऽपि प्रतिपादितम्। उक्तञ्च मन्त्रे-

आशाप्रतीक्षे संगतं सूनृतां च
इष्टापूर्ते पुत्रपशूंश्च सर्वान्।
एतद् वृङ्क्ते पुरुषस्याल्पमेधसो
यस्यानश्नन्वसति ब्राह्मणो गृहे ।।[21]

-अर्थात् यस्य गृहे अतिथिः अभुञ्जानो वसति तस्य गृहस्थस्य आशा, प्रतीक्षा, तत्योगजं फलं, प्रिया वाक्, इष्ट,आरामादिक्रियाफलं, पुत्रः, पशूंश्च विनश्यन्तीति।
एवं हि उपनिषत्सु आतिथ्यप्रशंसा अतिशयेन कृता वर्तते।

**मातृपितृसेवा:** सनातनसंस्कृतौ मातृपित्रोः स्थानं सर्वोपरि वर्त्तते । तौ एव आदिगुरुरपत्यस्य इति प्रसिद्ध एव । उपनिषदस्तु मातृपितरौ केवलं मनुष्यौ इति न मत्वा तयोः देवत्वं प्रतिपादयन्ति। उक्तमपि एवम्-

'मातृदेवो भव। पितृदेवो भव'[22]

इति- अर्थात् माता देवो यस्य स त्वं मातृदेवः स्याः इति भगवत्पादशङ्कराचार्याणां भाष्यवचनम्। तथैव पितृदेवोऽपि।
अपि च कठोपनिषदि नचिकता यमात् स्वीकृतेषु त्रिषु वरेषु आदौ पितृपरितोषरूपं वरमेव स्वीकृतम् । मन्त्रो यथा-

शान्तसंकल्पः सुमना यथा स्याद्
वीतमन्युर्गौतमो माभि मृत्यो।
त्वत्प्रसृष्टं माभिवदेत्प्रतीत
एतत्त्रयाणां प्रथमं वरं वृणे।। [23]

एवं यथा देवा पूज्यमानाः दृश्यन्ते तथैव पितरौ अपि देवत्वेन सततं सेवितव्यौ इति उपनिषदादेशः।

[13] कठोपनिषत् १/१/६
[14] तैत्तिरीयोपनिषत् १/११/१
[15] ईशोपनिषत् २
[16] तैत्तिरीयोपनिषत् १/११/३
[17] कठोपनिषत् १/१/३
[18] तैत्तिरीयोपनिषत् १/११/२
[19] चाणक्यनीतिशास्त्रसमुच्चयः ४/८
[20] कठोपनिषत् १/१/७
[21] कठोपनिषत् १/१/८
[22] तैत्तिरीयोपनिषत् १/११/३
[23] कठोपनिषत् १/१/१०

**स्वाध्याय:** छात्राणाम् अध्ययनं तप इति लोकप्रसिद्धं वचनम्। श्रद्धापूवकं गुरोः सकाशात् कृतस्वाध्यायादेव नित्यानित्यवस्तुविवेकज्ञानं भवति। किञ्च जीवनरूपमहासमुद्रसन्तरणाय ज्ञानमेव एकमात्रं आयुधः। तच्च न हि ज्ञानेन सदृशं पवित्रमिह विद्यते, ऋते ज्ञानान्न न मुक्तिः इत्यादिषु शास्त्रोक्तवाक्येषु ज्ञानमहिमा प्रदत्तः। ज्ञानं तु स्वाध्यायेन एव सम्पद्यते। स्वाध्याय एव अध्ययनपदेन व्यपदिश्यते। किञ्च पञ्चविधमहायज्ञेषु ब्रह्मयज्ञनामको यज्ञस्तु स्वाधायसम्बद्धः। तदेव उपनिषत्सु बहुधा प्रोक्तम्। "ऋतं च स्वाध्यायप्रवचने। सत्यं च स्वाध्यायप्रवचने च" इत्यादिषु वाक्येषु।
अपि च वेदाध्यानादनन्तरं गुरुः शिष्याय उपदिशति –

स्वाध्यान्मा प्रमदः। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्।[24]

**आत्महनननिन्दा:** भूमौ अस्यां साम्प्रतम् अवसादग्रस्तकारणाद् आत्महननस्य प्रवृत्तिः लोकेषु अधिकतया दृश्यमाना वर्तते। आत्मनुपलब्धिकारणात् परमात्मनः ज्ञानाभाद्वा ते आत्महननरूपं शास्त्रविरुद्धं कार्यं कुर्वन्ति। "किञ्च न जायते म्रियते वा कदाचिन्" इत्यादिषु श्रुतिवाक्येषु आत्मनो विभुत्वं सर्वव्यापकत्वं त्रैकालिकसंसर्गत्वं तु प्रसिद्धम्। अपि व्यवहारिकदृष्ट्याऽपि नात्महननेन समस्यायाः समाधानं दृश्यते। किञ्च तेन स परलोके अपि निकृष्टं स्थानमेव प्राप्नोति। तत्करणे स जनस्तु स्वपरिवाराय आत्मीयजनेभ्य च परमदुःखकरीं समस्यामेव उत्पादयति। अपि च ते अतः उपनिषत्सु तद्वारणाय उपदेशः प्रोक्तः-

असुर्या नाम ते लोका अन्धेन तमसाऽऽवृताः
तांस्ते प्रेत्यभिगच्छन्ति ये के चाऽत्महनो जनाः।। [25]

**समभावत्वम्:** भारतीयज्ञानगङ्गापरम्परायाम् उदारभावना समभावना च वेदादेव निसृता अस्ति। उदारचरितानां तु वसुधैव कुटुम्बकम् इति तस्यैव अभिव्यक्तिः। एवम् वेदान्ते समभावनायाः प्रकाशः प्रदत्तो वर्तते। यथोक्तम्-

यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते।। [26]

-अर्थात् यः पुरुषः सर्वस्मिन् चराचरात्मनि आत्मत्वेन पश्यति, स क्रान्तद्रष्टा सर्वभूतात्मना सह विजुगुप्सां न करोति। एवं हि परमात्मनः यथार्थज्ञपुरुषः अखिलान्यपि जडजङ्गमात्मानि परमात्मनोऽशंत्वेन मनुते। एवं समभावमन्यमानस्य मनुष्यस्य कृते कः शोकः को वा मोहः? तथैवोक्तम्-

यस्मिन् सर्वाणि भूतान्यात्मन्येवानुपश्यति।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः।। [27]

## उपसंहृति

उपनिषदस्तु न केवलं मन्त्रब्राह्मणात्मकशब्दराशेरन्तिमो भागोऽपि तु वेदस्य शीर्षभूताः सन्ति । जीवनस्य परमोत्कर्षसाधनमपि च आत्मज्ञानपुरःसरं परमपुरुषार्थाख्यं निःश्रेयसप्रदानमेव उपनिषदां मूलं लक्ष्यम् । इत्थम् उपनिषदां व्यवहारविषयकः पक्षो नितरां मनोऽभिरामः । दार्शनिकानि तत्त्वानि व्यवहारे प्रयुज्योपनिषद्विद्या मानवीयजीवनम् अतितरां रमयति । इत्येतद्धि तदीयं ललितवैशिष्ट्यम् । उन्नतं समृद्धं च आध्यात्मिकपथमारोढुं बहवः सद्गुणाः सन्त्यपेक्षिताः । अत उपनिषदो मनोरमा आख्यायिकाः निधाय जनसमुदायं तान् सद्गुणान् उपदिशन्ति। आत्मसंयम-तप-दान-आर्जव -अहिंसा - सत्यादि-सद्गुणाः जीवनं निःसन्दिग्धतया समुन्नयन्ति । तस्मात्ते उत्तमाः गुणाः उपनिषद्भिः तथा प्रदर्शिताः येन तान् अवलोक्य जनमानसः झटिति तान् स्वीकर्तुम् उपक्रमते ।उपनिषद् -ज्ञानगङ्गाधारायां सन्निहिताः नैतिकोपदेशास्तु समग्रेऽपि विश्वे साम्प्रतम् आम्नायन्ते। हिंसा-असत्यभाषण- अनध्ययन-परनिन्दा-परस्परविरोधभावनादिदोषान् निराकर्तुमेव उपनिषत्सृतिः प्रवहन्त्यस्ति । लोकेऽस्मिन् परिलक्ष्यमानान् मातृपित्रोस्त्यागः गुरूणां तिरस्कारोऽअन्ननिन्दा इत्यादीन् घोरान् दोषान् निवारयितुमेव वेदान्ता ऋषिभिर्दृष्टाः।। पूर्वोक्तदोषस्तु दूषितो जनो न केवलं स्वस्य अपकर्षं साधयति अपि तु समाजस्य अन्यान् जनान् अपि पीडयति। अतः उपनिषदों नितरां परमपुरुषार्थसाधनभूताः सन्त्यो लोकोत्तरसाधनभूतस्य नैतिकज्ञानस्य महोदधिं मनुष्याय अनादिकालादेव प्रयच्छन्त्यः सन्ति।

## सन्दर्भग्रन्थसूची


1. ईशादिदशोपनिषदः. दिल्ली: मोतीलाल बाराणसीदास, २०१७.
2. कुमार, दीपक. ईशोपनिषत्. वाराणसी: चौखम्बा सुरभारती प्रकाशन, २०१८.
3. गुप्ता, पुष्पा. कठोपनिषत्. वाराणसी: चौखम्बा सुरभारती प्रकाशन, २०१८.
4. तैलङ्गः, जगन्नाथशास्त्री. मुण्डकोपनिषत्. वाराणसी : भारतीय विद्या प्रकाशन, २०१७.
5. त्रिपाठी, जातवेद. उपनिषत्सु कर्मवादः. परिमल पाब्लिकेशन्स, १९९०.
6. द्विवेदी, कपिलदेव. वैदिक साहित्य एवं संस्कृति. वाराणसी: विश्वविद्यालय प्रकाशन, २०१८.
7. द्विवेदी, शिवप्रसाद. केनोपनिषत्. वाराणसी: चौखम्बा सुरभारती प्रकाशन, २०१६.
8. पणशीकर, वासदेव लक्ष्मण. ईशाद्यष्टोत्तरशतोपनिषदः. वाराणसी: चौखम्बा विद्याभवन, २०१०.
9. मिश्रः, जगदीशचन्द्र. वैदिकवाक्यस्येतिहासः. वाराणसी: चौखम्बा सुरभारती प्रकाशन,, २०१६.


[24] तैत्तिरीयोपनिषत् १/११/१
[25] ईशावास्योपनिषत् ३
[26] ईशावास्योपनिषत् ६
[27] ईशावास्योपनिषत् ७